# ।। श्रीमद्भविष्यपुराणम् ।।

## प्रथमकाण्डः ब्रह्मपर्व

विद्वान्. बिदरहल्लीत्युपाह्वः कृष्णाचार्यः

प्रथमाध्यायः

पाराशर्यवचः सरोजममलं गीतार्थगन्धोत्कटम् ।

नानाख्यानककेसरं हरिकथासम्बोधनाबोधिनम् ।

लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा ।

भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ।।

पीठिका पुराणागतिक्रमश्च - भारद्वाजादयो मुनयः पाण्डवप्रपौत्रं जनमेजयपुत्रं शातनीकं द्रष्टुमागताः । आगतान् तान् दृष्ट्वा हर्षेण शातनीकः स्वागतं व्याजहार, अर्घ्यपाद्यादिना पूजयामास । धर्मानुपदेष्टुं मुनीन् प्रार्थयामास च । तदा साक्षाद्धरेरवतारभूतः सकलमुनीनां गुरुः कृपालुः श्रीवेदव्यासः स्वशिष्याय सुमन्तवे प्रचोदयामास, उपदेष्टुं शातनीकाय ।

मनुविष्णुयमाद्यष्टादशसङ्ख्याका धर्मशास्त्रकाराः, ब्राह्मं ऐन्द्रं याम्यमित्यादयः अष्टौ व्याकरणशास्त्राणि । ब्राह्मं, पाद्मं, वैष्णवमित्यादीनि अष्टादशपुराणानि । एतेषु शास्त्रेषु किमधिकृत्य वक्तव्यमिति शातनीकमपृच्छत् सुमन्तुः । तत्र भविष्यपुराणं श्रोतुकामाय शातनीकायोपदिदेश सुमन्तुः ।

आचारः प्रथमो धर्मः श्रुत्युक्तश्च नरोत्तम ।

तस्मादस्मिन् समायुक्तो नित्यं स्यादात्मवान् द्विजः ।।

आचाराद्विच्युतो विप्रो न वेदफलमश्नुते ।

आचारेण च संयुक्तः सम्पूर्णफलभाक् स्मृतः ।।

इति विधिसद्भावात् पुराणेऽस्मिन् विशेषतो व्रतचर्यान् आश्रमाचारान् संस्कारलक्षणानि एवं जगतः सृष्ट्यादिकानि विषयाणि निरूपितानि सन्ति । विशेषतः भगवतः सवितोर्महिमानि विस्तृत योपवर्णितानि । नानाक्षेत्राणां महिमा, नित्यनैमित्तकर्मणां विधयश्चात्रोपवर्णिताः ।

पुराणोऽयं द्वादशसहस्रश्लोकात्मकः पूर्वमासीत्, ततः अनेकाख्यानैः सहितोऽर्धलक्षश्लोकात्मकत्वेन वृद्धोऽभवत् । आदौ चतुर्मुखो रुद्राय, रुद्रस्तु विष्णवे, विष्णुरपि नारदायोपदिदिशुः । नारदात् शक्रोऽवाप, शक्रात्पराशरः, पराशरात्पाराशरो व्यासः, व्यासात् सुमन्तुरवाप ।

द्वितीयोऽध्यायः

पुराणेऽस्मिन् पञ्चपर्वाणि सन्ति, ब्राह्मं, वैष्णवं शैवं त्वाष्टं, प्रतिसर्गं चेति । यदत्र सर्गप्रतिसर्गादयश्चात्रोपवर्णिताः

तत्सर्वपुराणसाधारणा विषयाः ।

अष्टादशविद्याः — शिक्षा, व्याकरणम्, छन्दः, ज्योतिषं, निरुक्तं कल्पेति वेदाङ्गानि षट् । ऋगादयश्चत्वारो , मीमांसा, न्यायः, पुराणं धर्मशास्त्रं, आयुर्वेदः, धनुर्वेदः, गान्धर्वः, अर्थशास्त्रं चेति । एतासां विद्यानामधिकृत्योपदेशोऽत्रास्ति ।

क्षेत्रज्ञः, पुरुषः, वेधाः, शम्भुः नारायणः, ब्रह्मेति पर्यायवाचकाः शब्दाः । एतस्मान्नारायणात् सृष्टा आपः नारा इति प्रोक्ताः । ता आप एवायनं ब्रह्मणः, अतो ब्रह्म 'नारायणः' इति प्रोक्तः ।

सः स्ववीर्यं जले ह्यवासृजत् । तस्मादण्डं समभूत् । स्वर्णमयोऽयमण्डो ब्रह्माण्ड इति प्रथितः । तत्र चतुर्मुखो जज्ञे । ततो महत्तत्वं, ततोऽहङ्कारतत्वं, ततः पञ्चमहाभूतानि, तत विंशतितत्वानि सृष्टानि । ततो मूर्तामूर्तात्मकः प्रपञ्चः सृष्टोऽभूत् । ततो ब्राह्मणादिचतुर्वर्णानि, चतुर्वेदाः, यजनयाजनाध्ययनाध्यापनदानप्रतिग्रहकृषिवाणिज्यकुसीदादिवृत्तयोः सृष्टा अभूवन् । निमेषादिकल्पपर्यन्तः कालः सृष्टोऽभूत् । एको मानवमासः पितृणां दिनम् । मानवानां वर्षः देवानां दिनम् । देवानां द्वादशसहस्रवर्षाणि एकं महायुगम् । युगसहस्रं ब्राह्मम् अहः, तावत्येव रात्रिः, एकसप्ततियुगानि मनोरेकस्यावधिः । चतुर्दशमन्वन्तराणि ब्रह्मण एकस्मिन् दिने सम्भवन्ति । कृतयुगे पूर्णप्रमाणधर्माचरणम्, तपः परमोधर्मः । धर्माचरणे पादोनं त्रेतायां, ज्ञानं परमोधर्मः । अर्धह्रासः द्वापरे यज्ञं परमोधर्मः । कलौ तु दानं मुख्यो धर्मः ।

विप्राणां विप्रत्वसंरक्षणाय विशेषकर्माणि विहितानि ।

तेषु कर्मसु षोडशसंस्काराणि -

१. गर्भादानं, २. पुंसवनं, ३. सीमन्तोन्नयनं ४. वैष्णवबलिः ५. जातकर्म ६. नामकरणम्, ७. उपनिष्क्रमणम्, ८. अन्नप्राशनं, ९. चूडाकर्म, १०. उपनयनं, ११. महानाम्नि, १२. महाव्रतम्, १३. उपनिषद्व्रतम्, १४. गोदानम्, १५. समावर्तनम् १६. विवाहः

तथा चतुर्विंशत्संस्काराः

देवयज्ञं, पितृयज्ञं, नृयज्ञं, भूतयज्ञं, ब्रह्मयज्ञमिति पञ्चयज्ञानि । अष्टकश्राद्धं, पार्वणश्राद्धं, श्रावणीश्राद्धं, आग्रहायणीश्राद्धं चैत्रीयश्राद्धम्, आश्वयुजीश्राद्धमिति पञ्चश्राद्धानि । अग्न्याधानं, अग्निहोत्रं, दर्शं, पौर्णमासं, चातुर्मास्यं, निरूढपशुवधं सौत्रामणी इति सप्तपाकयज्ञानि । अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडषी, वाजपेयः, अतिरात्रः, आप्तोर्यामेति सप्तहविर्यज्ञानि । आहत्यचतुर्विंशत्संस्काराः विप्राणामेव ।

अष्टौ आत्मगुणाः -

१. अनुसूया - न गुणान् गुणिनो हन्ति न स्तौत्यात्मगुणानपि ।

प्रहृष्यते नान्यदोषैरनसूया प्रकीर्तिता ।।

२. दया - अपरे बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा ।

आत्मवद्वर्तनं यत्स्यात् सा दया परिकीर्तिता ।।

३. क्षान्तिः - वाचा मनसि काये च दुःखेनोत्पादितेन च ।

न कुप्यति न चाप्रीतिः सा क्षमा परिकीर्तिता ।।

४. अनायासं - शरीरं पीड्यते येन शुभेनापि च कर्मणा ।

अत्यन्तं तन्न कुर्वीत अनायासः स उच्यते ।।

५. शौचं - अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः ।

आचारे च व्यवस्थानं शौचमेतत्प्रकीर्तितम् ।।

६. मङ्गलं - प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् ।

एतद्धि मङ्गलं प्रोक्तं मुनिभिः ब्रह्मवादिभिः ।।

७. अकार्पण्यम् - स्तोकादपि प्रदातव्यं अदीनेनान्तरात्मना ।

अहन्यहनि यत्किञ्चिद् अकार्पण्यं तदुच्यते ।।

८. अस्पृहा - यथोत्पन्नेन सन्तुष्टः स्वल्पेनाप्यथ वस्तुना ।

अहिंसया परस्वेषु साऽस्पृहा परिकीर्तिता ।।

एतैरष्टगुणैर्युक्ताः ब्रह्मलोकमाप्नुवन्ति ।

षोडशोत्तरद्विशततमोऽध्यायः

निम्बसप्तमीव्रतम् - पूजकोऽभिमन्त्रितोदकेन स्वां तनुं सम्प्रोक्ष्य हृदाद्यङ्गेषु न्यासं कुर्यात्, स्वतः सूर्यदेवः सन्निहितोऽस्ति इति भावयेत् । पञ्चवर्णैरष्टदलपद्मं रचयेत् । तत्राग्नेयदले देवस्य शिरः, ईशान्ये हृदयं, नैरृत्ये शिखां, पूर्वे नेत्रे चावाहयेत् । आवाहनादिमुद्राः प्रदर्शयेत् । देवस्य परितोऽङ्ग देवतान् स्थापयेत् । ततः परितो नवग्रहदेवान्, ततो द्वादशादित्यान्, ततो बहिरष्टदिक्पालान्, ततो बहिः जयविजयादि शक्तिदेवान्, देवस्य दक्षिणभागे प्राज्ञा, क्षुधा, वीरा इत्यादिदेवाताश्च आवह्य पूजयेत् । ततो निम्बप्राशनम् ।

त्वं निम्ब कटुकात्मासि आदित्यनिलयस्तथा । सर्वरोगहरः शान्तो भव मे प्राशनं सदा ।।

इति निम्बं स्तुत्वा ततः प्राशयेत् । ततो यथाशक्त्या ब्राह्मणाराधनं कुर्यात् । ततो भोजनं स्वीकुर्यात् । संवत्सरे द्वादशशुद्धसप्तमीष्वेतद्व्रतं कुर्यात् । अनेन व्रतानुष्ठानेन सर्वे रोगाः प्रणश्यन्ति ।

फलसप्तमीव्रतम्- भाद्रपदशुक्लसप्तम्यामुपोषणम् । सप्तम्यां देवस्य पुरतः खर्जूरनारिकेलमातुलिङ्गादीनि फलानि स्थापयेत् । देवाय समर्प्य ब्राह्मणेभ्यो दद्यात् । अनेन व्रताचरणेनाश्वमेधादियज्ञाचरणेन यत्फलमाप्नोति तत्समं फलमाप्नोति । सर्वे वर्णीयाः संकरवर्णीयश्चात्राधिकारिणः ।

इतिहासपुराणश्रवणफलम् - अध्यायेऽस्मिन् अतिदीर्घतया पुराणिकस्य महिमा उपवर्णिता । पुराणिकः श्राद्धादिसर्वकर्मसु पङ्क्तिपावनो भूत्वा कर्मणः षाड्गुण्यावाहकः । सर्वाप्युत्सवानि च पुराणिकः सम्पन्नानि करोति । प्रतिदिवसेषु वा सङ्क्रमणेषु वा पर्वसु वा पुराणिकाय सुवर्णादिकान् दत्वा सम्पूजयेत् । इतिहासपुराणज्ञं 'व्यासः' इति सम्पूजयेत् । इतिहासपुराणज्ञं, धीरकण्ठं, स्फुटवाणिं निःस्फृहम् इत्यादिगुणोपेतमुत्तमपुराणिमिति विजानीयात् । रहस्यानभिज्ञं परमन्यगुणोपेतं मध्यमपुराणिकमिति विज्ञेयम् । अस्फुटवाणिमधममिति विजानीयात् । सर्वाणि इतिहासपुराणानि 'जयः' इति प्रसिद्धानि । तदुपजीवः 'जयोपजीवी' इति शास्त्रे उक्तम् । पुराणिकः सर्वेषामपि गुरुस्थानीयः । ब्राह्मण एव पुराणवाचने अधिकारी ।

पुराणपुस्तकानां महिमा -

पत्राणि भगवान् ब्रह्मा अक्षराणि जनार्दनः । शङ्करश्च तथासूत्रं पङ्क्तयः सर्वदेवताः ॥

इत्थं देवमयं ह्येतत् पुस्तकं देवपूजितम् । नमस्यं पूजनीयश्च गृहे स्थाप्य विभूतये ॥

*****

## ॥ इति श्रीमद्भविष्यपुराणे प्रथमो भागः ॥

## ॥ अथ श्रीमद्भविष्यपुराणे द्वितीयो भागः ॥

(भाग. २, खं.१)

प्रथमाध्यायः

विषयानुक्रमणिका - प्रतिष्ठादिनिर्णयम्, धर्मब्राह्मणप्रशंसनम्, आपद्धर्माः, विद्यामहिमा, प्रतिमालक्षणम्, प्रतिष्ठापद्धतिः, कालनिर्णयः, प्रतिसर्गः, पुराणलक्षणानि, भूगोलवर्णनम्, मरणोन्मुखस्य कर्तव्यानि, प्रायश्चित्तभागः, इत्यादिविषयाः पुराणेऽस्मिन् निरूपिताः सन्ति । आहत्य ८९६० श्लोकाः , पञ्चविंशत्यध्यायात्मिकानि पञ्चपर्वाणि च सन्ति ।

षष्ट्यधिकाष्टसाहस्रनवश्लोकास्ततोद्भवे ।

पञ्चतन्त्रसमायुक्ते प्रतितन्त्रे च विंशतिः ॥

पञ्चोत्तरं तथाध्यायाः पुराणेऽस्मिन् द्विजोत्तमाः ॥

मानवसामान्यधर्माः - सर्वाश्रमाणां गृहस्थो मुख्याश्रयः । अतो गार्हस्थ्यधर्मः सर्वश्रेष्ठः । ये सात्विकाः ते यान्ति परलोकान्, ये राजसाः ते भ्रमन्ति संसारे, ये तामसाः ते यान्ति अधोलोकान् । ये धर्मे रतास्ते अत्र सर्वक्षेमं विन्दन्ते तत उत्तमलोकांश्चावाप्नुवन्ति । निष्कामनया धर्मान् आचरेत् । यतो वा, यः कोऽपि न कूपसमीपे अन्यत् कूपं, तटाकसमीपे अन्यत्तटाकं, मठसमीपे मठान्तन्तरं च कारयेत्, अतः सर्वार्थकारकाणि निष्कामकर्माणि । नाश्रयेत् कुत्सितानि कर्माणि । यज्ज्ञानपूर्वं धर्माचरणं तन्निवृत्तिमार्गम्, विना ज्ञानेनाचरिताः धर्माः प्रवृत्तिधर्मा

इति विजानीयात् । सत्यं अलम्बुद्धिरास्थिक्यमित्यादयः पञ्चदशगुणाः सर्ववर्णानां समानाः ।

यः कर्मठो विप्रः स आप्नोति प्राजापत्यलोकम् । रणरङ्गादनिवृत्तः क्षत्रियो हीन्द्रलोकमाप्नोति । स्वधर्मनिरतो वैश्य आप्नोत्यमृतलोकम् । शूद्रस्तु गन्धर्वलोकं गच्छति । अष्टाशीतिवर्षपर्यन्तं तपः तप्त्वा मुनिर्यं लोकमाप्नोति तं लोकं द्वादशवर्षगुरुकुलवासेन ब्रह्मचार्याप्नोति । वानप्रस्थस्तु सप्तर्षिलोकं गच्छति । गृहस्थः प्राजापत्यलोकं, यतिः ब्रह्मलोकमाप्नोति ।

## षडुत्तरद्विशततमोऽध्यायः

रोहिणीचन्द्रशयनव्रतम् —– यस्यां पौर्णम्यामिन्दुवासरस्य योगो भवति तस्मिन् दिने व्रतमिदं चरणीयम् । अथवा रोहिणीयुक्तायां पौर्णम्यां वा चरणीयम् । दिनेऽस्मिन् प्रातः स्नानानन्तरं पञ्चगव्यं प्राशयेत् । 'आप्यायस्व....' इति मन्त्रं सहस्रवारं जपेत् । स्वर्णमयीं षडङ्गुलपरिमितां चन्द्रप्रतिमां, चतुरङ्गुलपरिमितां रोहिणीप्रतिमां च कारयेत् । प्रतिमयोः पूजां चरेत् । तयोरवयवेषु प्रत्येकं पूजां समर्पयेत् । पूजार्थमत्र चन्द्रनामान्युपदिष्टानि सन्ति । गन्धादिसकलोपचारद्रव्यैः, अर्घ्यपाद्यादिसकलोपचारपूजाः समर्पयेत् । ततो दम्पतीभ्यां सम्मानयेत्, ताभ्यां प्रतिमे दद्यात् । दानसमये कांस्यकुम्भे क्षीररत्नानि निक्षिप्य तदुपरि प्रतिमे स्थापयेत् । ततः सकुम्भे प्रतिमे दद्यात् । तद् ब्राह्मणे चन्द्रं, तत्पत्न्यां रोहिणीं चावाहयेत् । श्वेतवर्णां गां सवत्सां दद्यात् । अनेन कर्मणा पुनरावर्तिरहितचन्द्रलोकावाप्तिः फलम् ।

## सप्तोत्तरद्विशततमोऽध्यायः

श्रीकृष्णप्रतिगमनम् - धर्मकाममोक्षदामतिरहस्यात्मिकामिमां विद्यां धर्मनन्दनः कृष्णादवाप । 'इमां विद्यां न नास्तिकाय, कुतर्किणे दद्यात् । केवलं सज्जनेभ्यो दद्यात्' इत्युक्त्वा मुनिभ्यो नमस्कृत्वा द्वारकां प्रत्यगमत् कृष्णः ।

## अष्टोत्तरद्विशततामोऽध्यायः

अनुक्रमणिकाध्यायः - अध्यायेऽस्मिन् पुराणस्यास्योत्तरखण्डोक्तानां कनिचिद्व्रतानामुल्लेखोऽस्ति । सङ्क्षेपतयानुक्रमणिकोक्ता ।

इतिभविष्यमहापुराणं सम्पूर्णम्

०-०-०-०-०-०